इन्द्रियाणि=इन्द्रियों को		आत्मेन्द्रियमनोयुक्तम्=शरीर इन्द्रिय मन के सहित	
हयान्=घोड़े		आत्मानम्=आत्मा को	
आहुः=कहते हैं		मनीषिणः=विवेकी जन	
विषयान्=विषयों को		भोक्ता इति=भोक्ता करके	
तेषु=उनके		आहुः=कहते हैं	
गोचरान्=मार्ग			
आहुः=कहते हैं			

मूलम् ।

यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥ ५ ॥

पदच्छेदः ।

यः, तु, विज्ञानवान्, भवति, अयुक्तेन, मनसा, सदा, तस्य, इन्द्रियाणि, अवश्यानि, दुष्टाश्वाः, इव, सारथेः ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
तु=और		तस्य=उसकी	
यः=जो पुरुष		इन्द्रियाणि=इन्द्रियां	
अयुक्तेन=अयुक्त		सारथेः=सारथि के	
मनसा=मन करके		दुष्टाश्वाः=दुष्ट घोड़ों के	
सदा=सदा		इव=समान	
अविज्ञानवान्=अविवेकी		अवश्यानि=बेवश	
भवति=होता है		भवन्ति=होती हैं	

मूलम् ।

यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ ६ ॥

पदच्छेदः ।

यः, तु, विज्ञानवान्, भवति, युक्तेन, मनसा, सदा, तस्य, इन्द्रियाणि, वश्यानि, सदश्वाः, इव, सारथेः ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
तु=और		तस्य=उसकी	
यः=जो पुरुष		इन्द्रियाणि=इन्द्रियां	
युक्तेन=युक्त		सारथेः=सारथी के	
मनसा=मन करके		सदश्वाः इव=श्रेष्ठ घोड़ों के समान	
सदा=सदैव		वश्यानि=वशीभूत	
विज्ञानवान्=विवेकी		भवन्ति=होती हैं	
भवति=होता है			

मूलम् ।

यस्त्वविज्ञानवान् भवत्यमनस्कः सदाशुचिः न स तत्पदमाप्नोति संसारं चाधिगच्छति ॥ ७ ॥

पदच्छेदः ।

यः, तु, अविज्ञानवान्, भवति, अमनस्कः, सदा, अशुचिः, न, सः, तत्, पदम्, आप्नोति, संसारम्, च, अधिगच्छति ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
तु=और		अमनस्कः=मन की एकाग्रता से रहित	
यः=जो		सदा=सदैव	
अविज्ञानवान्=विवेक रहित		अशुचिः=अपवित्र	
च=और			

भवति=होता है	आप्नोति=प्राप्त होता है
सः=सो	च=परन्तु
तत्पदम्=उस पद को यानी मोक्ष को	संसारम्=संसार को ही
न=नहीं	अधिगच्छति=प्राप्त होता है

मूलम् ।

यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥ ८ ॥

पदच्छेदः ।

यः, तु, विज्ञानवान्, भवति, समनस्कः, सदा, शुचिः, सः, तु, तत्, पदम्, आप्नोति, यस्मात्, भूयः, न, जायते ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
तु=और		तु=निश्चय करके	
यः=जो		तत्=उस	
विज्ञानवान्=विवेकी		पदम्=पद को	
समनस्कः=एकाग्र चित्तवाला		आप्नोति=प्राप्त होता है	
सदा=सदा		यस्मात्=जिस करके	
शुचिः=पवित्र		भूयः=फिर	
भवति=होता है		न=नहीं	
सः=वह		जायते=उत्पन्न होता है	

मूलम् ।

विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः सोऽध्वनः पारमाप्नोति तद्विष्णोः परमम्पदम् ॥ ९ ॥

पदच्छेदः ।

विज्ञानसारथिः, यः, तु, मनः, प्रग्रहवान्, नरः, सः, अध्वनः, पारम्, आप्नोति, तत्, विष्णोः, परमम्, पदम् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यः	जो	सः	वह
विज्ञान-सारथिः	विज्ञान सारथी है	अध्वनः	संसार मार्ग के
तु	और	पारम्	पार को
मनः	मनरूपी	आप्नोति	प्राप्त होता है
प्रग्रहवान्	बाग का ग्रहण करने वाला	तत्	सोई
नरः	पुरुष है	विष्णोः	विष्णु का
		परमम्	परम
		पदम्	पद है

मूलम् ।

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः मनसश्च परा बुद्धि-र्बुद्धेरात्मा महान् परः ॥ १० ॥

पदच्छेदः ।

इन्द्रियेभ्यः, पराः, हि, अर्थाः, अर्थेभ्यः, च, परम्, मनः, मनसः, च, परा, बुद्धिः, बुद्धेः, आत्मा, महान्, परः ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
इन्द्रियेभ्यः	इन्द्रियों से	च	और
पराः	परे	मनसः	मन से
हि	निश्चय करके	परा	परे याने सूक्ष्म
अर्थाः	विषय हैं क्योंकि इन्द्रियों की प्रवृत्ति विषयों के आधीन है	बुद्धिः	बुद्धि है
अर्थेभ्यः	विषयों से	च	और
परम्	परे	बुद्धेः	बुद्धि से
मनः	मन है	परः	परे
		महान्	महान्
		आत्मा	हिरण्यगर्भ है

मूलम् ।

महतः परमव्यक्तमव्यक्तात् पुरुषः परः पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ॥ ११ ॥

पदच्छेदः ।

महतः, परम्, अव्यक्तम्, अव्यक्तात्, पुरुषः, परः, पुरुषात्, न, परम्, किंचित्, सा, काष्ठा, सा, परा, गतिः ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
महतः	हिरण्यगर्भ से	सा	सोई
परम्	परे	काष्ठा	अवधि है यानी परम आश्रय है
अव्यक्तम्	[illegible] है	च	और
अव्यक्तात्	[illegible] आकृतवाले माया से	सा	सोई
परः	परे	परा	सर्वोत्तम
पुरुषः	आत्मा है	गतिः	गति है अर्थात् प्राप्त होने योग्य है
पुरुषात्	आत्मा से		
परम्	परे		
न किञ्चित्	कुछ नहीं है		

मूलम् ।

एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ १२ ॥

पदच्छेदः ।

एष, सर्वेषु, भूतेषु, गूढात्मा, न, प्रकाशते, दृश्यते, तु, अग्रया, बुद्ध्या, सूक्ष्मया, सूक्ष्मदर्शिभिः ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
एषः	यह	सर्वेषु	सब
गूढात्मा	गूढात्मा	भूतेषु	भूतों विषे

न=नहीं
प्रकाशते={ प्रकाशता है यानी सबको नहीं देखाई देता है
तु=परन्तु
अग्र्यया=एकाग्र
सूक्ष्मया=सूक्ष्म

बुद्ध्या=बुद्धि द्वारा
सूक्ष्मदर्शिभिः=सूक्ष्मदर्शी ज्ञानियों करके
दृश्यते={ देखा जाता है यानें अनुभव किया जाता है

मूलम् ।

यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥ १३ ॥

पदच्छेदः ।

यच्छेत्, वाङ्मनसी, प्राज्ञः, तत्, यच्छेत्, ज्ञाने, आत्मनि, ज्ञानम्, आत्मनि, महति, नियच्छेत्, तत्, यच्छेत्, शान्ते, आत्मनि ॥

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

प्राज्ञः=बुद्धिमान् पुरुष
वाक्=वाणी को
मनसी=मन विषे
यच्छेत्=लय करै
च=और
तत्=उस मन को
ज्ञाने=ज्ञानरूपी
आत्मनि=आत्मा याने बुद्धि में
यच्छेत्=लय करै
च=और

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

ज्ञानम्=ज्ञान याने बुद्धि को
महति=महान्
आत्मनि=हिरण्यगर्भ में
नियच्छेत्=लय करै
+ च=और
तत्=तिस महानात्मा हिरण्यगर्भ को
शान्ते=शान्त
आत्मनि=अधिष्ठान आत्मा में
यच्छेत्=लय करै

मूलम् ।

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत क्षुरस्य धारा निशिता दुरत्यया दुर्गम्पथस्तत्कवयो वदन्ति ॥ १४ ॥

पदच्छेदः ।

उत्तिष्ठत, जाग्रत, प्राप्य, वरान्, निबोधत, क्षुरस्य, धारा, निशिता, दुरत्यया, दुर्गम्, पथः, तत्, कवयः, वदन्ति ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
+ हे जन्तवः	हे मनुष्यो	ज्ञानम्	ज्ञान
+ यूयम्	तुम	क्षुरस्य	छुरी की
उत्तिष्ठत	उठो	निशिता	तीक्ष्ण
जाग्रत	जागो	धारा	धारकी तरह
च	और	दुरत्यया	कठिन है
वरान्	श्रोत्रिय ब्रह्मनिष्ठ आचार्य को	च	और
प्राप्य	प्राप्त होकर	तत्	उसीको
+ आत्मानम्	आत्मा को	कवयः	विद्वान् लोक
निबोधत	जानो	दुर्गम् पथः	दुर्गम मार्ग
		वदन्ति	कहते हैं

मूलम् ।

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसन्नित्यमगन्धवच्च यत् अनाद्यनन्तम्महतः परन्ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते ॥ १५ ॥

पदच्छेदः ।

अशब्दं, अस्पर्शम्, अरूपम्, अव्ययम्, तथा, अरसम्, नित्यम्, अगन्धवत्, च, यत्, अनादि, अनंतम्, महतः, परम्, ध्रुवम्, निचाय्य, तत्, मृत्युमुखात्, प्रमुच्यते ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यत्	जो	तथा	और
अशब्दम्	शब्दरहित है	अरसम्	रसरहित है
अस्पर्शम्	स्पर्शरहित है	नित्यम्	नित्य है
अरूपम्	रूपरहित है	अगन्धवत्	गन्धरहित है
अव्ययम्	अविनाशी है	च	और

अनादि=आदिरहित है
अनन्तम्=अंतरहित है
महतः=महत्तत्त्व से
परम्=परे है
ध्रुवम्=अचल है
तत्=तिसको
निचाय्य=जानकरके
पुरुषः=पुरुष
मृत्युमुखात्=मृत्यु के मुख से
प्रमुच्यते=छूटजाता है

मूलम् ।

नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनम् उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते ॥ १६ ॥

पदच्छेदः ।

नाचिकेतम्, उपाख्यानम्, मृत्युप्रोक्तम्, सनातनम्, उक्त्वा, श्रुत्वा, च, मेधावी, ब्रह्मलोके, महीयते ॥

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

मृत्युप्रोक्तम्=मृत्युकरके कही हुई
सनातनम्=सनातन
नाचिकेतम्=नचिकेतासम्बन्धी
उपाख्यानम्=आख्यायिका को
उक्त्वा=कथन करके

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

च=और
श्रुत्वा=श्रवण करके
मेधावी=बुद्धिमान् पुरुष
ब्रह्मलोके=ब्रह्मलोक में
महीयते=महिमा को प्राप्त होता है

मूलम् ।

य इमं परमं गुह्यं श्रावयेद् ब्रह्मसंसदि प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते तदानन्त्याय कल्पते इति ॥ १७ ॥

तृतीया वल्ली समाप्ता ।

पदच्छेदः ।

यः, इमम्, परमम्, गुह्यम्, श्रावयेत्, ब्रह्मसंसदि, प्रयतः, श्राद्धकाले, वा, तत्, आनन्त्याय, कल्पते, तत्, 'आनन्त्याय' कल्पते, इति ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यः=जो		श्राद्धकाले=श्राद्धके समय विषे	
इमम्=इस		श्रावयेत्=सुनावै तो	
परमम्=परम		तत्=वह सुनाना	
गुह्यम्=गोप्यनीय विद्या को		आनन्त्याय=अनन्त फल के अर्थ	
ब्रह्मसंसदि=ब्राह्मणों की सभा में		कल्पते=माना जाता है	
वा=अथवा		आनन्त्याय=अनन्त फल के अर्थ	
प्रयतः=पवित्र होकर		कल्पते=माना जाता है	

इति कठवल्लीउपनिषद्प्रथमाध्याये तृतीया वल्ली भाषाटीका समाप्ता ॥

इति प्रथमोध्यायः समाप्तः ॥

मूलम् ।

ॐ पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्मन् कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥१॥

पदच्छेदः ।

पराञ्चि, खानि, व्यतृणत्, स्वयम्भूः, तस्मात्, पराङ्, पश्यति, न, अन्तरात्मन्, कश्चित्, धीरः, प्रत्यक्, आत्मानम्, ऐक्षत्, आवृतचक्षुः, अमृतत्वम्, इच्छन् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
स्वयम्भूः=परमेश्वर		कश्चित्=कोई विरला	
खानि=इन्द्रियों को		धीरः=धीर पुरुष	
पराञ्चि=बाह्य विषयों की ओर जानेवाली		अमृतत्वम्=अमरभाव की	
व्यतृणत्=रचता भया		इच्छन्=इच्छा करता हुआ	
तस्मात्=तिसी कारण से		आवृतचक्षुः=चक्षु इन्द्रियों को विषयों से हटा कर	
पराङ्=विषयों को ही		प्रत्यक्=अंतर	
पश्यति=देखती हैं		आत्मानम्=आत्मा को	
अन्तरात्मन्=अन्तरात्मा को		ऐक्षत=देखता है	
न=नहीं देखती हैं			

मूलम् ।

पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम् अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ॥ २ ॥

पदच्छेदः ।

पराचः, कामान्, अनुयन्ति, बालाः, ते, मृत्योः, यन्ति, विततस्य, पाशम्, अथ, धीराः, अमृतत्वम्, विदित्वा, ध्रुवम्, अध्रुवेषु, इह, न, प्रार्थयन्ते ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
पराचः=बाह्य	
कामान्=विषयों को	
बालाः=अज्ञानी पुरुष	
अनुयन्ति=प्राप्त होते हैं	
च=और	
ते=वेही	
मृत्योः=मृत्यु के	
विततस्य=फैले हुये	
पाशम्=रस्सा को	
यन्ति=प्राप्त होते हैं	
अथ=और	
धीराः=विवेकी पुरुष	
ध्रुवम्=नित्य	
अमृतत्वम्=अमररूप आत्मा को	
विदित्वा=जानकरके	
इह=इस संसार विषे	
अध्रुवेषु=अनित्य भोगों को	
न प्रार्थयन्ते=नहीं चाहते हैं	

मूलम् ।

येन रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनान् एतेनैव विजानाति किमत्र परिशिष्यते एतद्वै तत् ॥ ३ ॥

पदच्छेदः ।

येन, रूपम्, रसम्, गन्धम्, शब्दान्, स्पर्शान्, च, मैथुनान्, एतेन, एव, विजानाति, किम्, अत्र, परिशिष्यते, एतत्, वै, तत् ॥

अन्वयः — पदार्थसहित सूक्ष्म भावार्थ

येन=जिस साक्षिआत्मा करके
रूपम्=रूपको
रसम्=रसको
गन्धम्=गन्धको
शब्दान्=शब्दों को
स्पर्शान्=स्पर्शों को
च=और
मैथुनान्=मैथुनों को
एवं=ठीक ठीक
\+ पुरुषः=पुरुष
विजानाति=अच्छे प्रकार जानता है

अन्वयः — पदार्थसहित सूक्ष्म भावार्थ

तत्=सोई
वै=निश्चय करके
एतत्=यह ब्रह्म है
च=और
एतेन=इस आत्मा से और
किम्=क्या
अत्र=यहां
परिशिष्यते=जानने को शेष रहता है याने जानने योग्य कुछ भी बाक़ी नहीं रहता है

मूलम् ।

स्वप्नांतं जागरितान्तञ्चोभौ येनानुपश्यति महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ ४ ॥

पदच्छेदः ।

स्वप्नान्तम्, जागरितान्तम्, च, उभौ, येन, अनुपश्यति, महान्तम्, विभुम्, आत्मानम्, मत्वा, धीरः, न, शोचति ॥

अन्वयः — पदार्थसहित सूक्ष्म भावार्थ

उभौ=दोनों यानी
स्वप्नांतम्=स्वप्नकाल के पदार्थों को
च=और
जागरितान्तम्=जाग्रतकाल के पदार्थों को
येन=जिस साक्षि चेतन करके

अन्वयः — पदार्थसहित सूक्ष्म भावार्थ

\+ पुरुषः=पुरुष
अनुपश्यति=स्पष्ट देखता है
एतत्=वही
वै=निश्चय करके
तत्=यह ब्रह्म है
\+ च=और
महान्तम्=महान्
विभुम्=व्यापक

आत्मानम्=आत्मा को
मत्वा=जान करके
धीरः=धीर पुरुष
न शोचति=नहीं शोच को प्राप्त होता है

मूलम् ।

य इमं मध्वदं वेद आत्मानं जीवमन्तिकात् ईशानम्भूतभव्यस्य न ततो विजिगुप्सते एतद् वै तत् ॥ ५ ॥

पदच्छेदः ।

यः, इमम्, मध्वदम्, वेद, आत्मानम्, जीवम्, अन्तिकात्, ईशानम्, भूतभव्यस्य, न, ततः, विजुगुप्सते, एतत्, वै, तत् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यः	जो कोई	वेद	जानता है
इमम्	इस	सः	वह
मध्वदम्	कर्मफल का भोक्ता	ततः	फिर
अन्तिकात्	समीपवर्ती	न विजुगुप्सते	अपने आपकी रक्षाकी इच्छा नहीं करता है
भूतभव्यस्य	कालत्रय का	तत्	सोई आत्मा
ईशानम्	नियामक	वै	निश्चय करके
जीवम्	जीवरूप	एतत्	यह ब्रह्म है
आत्मानम्	आत्मा को		

मूलम् ।

यः पूर्वन्तपसो जातमद्भ्यः पूर्वमजायत गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत एतद्वै तत् ॥ ६ ॥

पदच्छेदः ।

यः, पूर्वम्, तपसः, जातम्, अद्भयः, पूर्वम्, अजायत, गुहाम्, प्रविश्य, तिष्ठन्तम्, यः, भूतेभिः, व्यपश्यत, एतत्, वै, तत् ।

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यः=जो	
पूर्वम्=पहले	
तपसः=ब्रह्मसे	
जातम्=उत्पन्न हुआ है	
च=और	
अद्भ्यः=जलादि पंचतत्त्वों से	
पूर्वम्=पूर्व	
अजायत=उत्पन्न हुआ है	
च=और	
यः=जो	
✓भूतेभिः=कार्यकारणसंघात के सहित	

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
✓गुहाम्=हृदयाकाशरूप गुहाविषे	
प्रविश्य=प्रवेशकरके	
✓तिष्ठन्तम्=स्थित है	
+ तद्धिरण्यम्=तिस हिरण्य-गर्भ को	
यः=जो पुरुष	
✓व्यपश्यत=देखता है	
तत्=सोई	
वै=निश्चय करके	
एतत्=यह ब्रह्म है	

मूलम् ।

या प्राणेन सम्भवत्यदितिर्देवतामयी गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत एतद्वै तत् ॥ ७ ॥

पदच्छेदः ।

या, प्राणेन, सम्भवति, अदितिः, देवतामयी, गुहाम्, प्रविश्य, तिष्ठन्तीम्, या, भूतेभिः, व्यजायत, एतत्, वै, तत् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
या=जो	
देवतामयी=देवतारूप	
प्राणेन=प्राणकरके	
सम्भवति=उत्पन्न होताहै	
+ सा=सोई	
✓अदितिः=अदितिरूप है	
च या=और जो	

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
✓भूतेभिः=सब भूतों के साथ तादात्म्यताको प्राप्त होकर के	
व्यजायत=उत्पन्न हुआ है	
च=और	
गुहाम्=हृदयाकाशविषे	

प्रविश्य=प्रवेश करके	वै=निश्चय करके
तिष्ठन्तीम्=स्थित है	एतत्=यह ब्रह्म है
तत्=सोई	

मूलम् ।

अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥ ८ ॥

पदच्छेदः ।

अरण्योः, निहितः, जातवेदाः, गर्भः, इव, सुभृतः, गर्भिणीभिः, दिवे, दिवे, ईड्यः, जागृवद्भिः, हविष्मद्भिः, मनुष्येभिः, अग्निः, "एतत्, वै, तत्" ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
अरण्योः	दोनों अरणियों विषे	जागृवद्भिः	जाग्रत् स्वभाव वाले याने प्राणायाम के करनेवाले
जातवेदाः	वैश्वानर अग्नि	च	और
निहितः	स्थित है	हविष्मद्भिः	हवन के करने वाले
इव	जैसे	मनुष्येभिः	मनुष्यों करके
गर्भिणीभिः	गर्भवती स्त्री करके	दिवे दिवे	प्रतिदिन
सुभृतः	धारण किया हुआ	ईड्यः	स्तुति करने योग्य है
गर्भः	गर्भ	तत्	वही
+ निहितः	स्थित है	वै	निश्चय करके
च	और	एतत्	यह ब्रह्म है
+ यः	जो		
अग्निः	अग्नि		

मूलम् ।

यतश्चोदेति सूर्य्योऽस्तं यत्र च गच्छति तन्देवाः सर्वेऽर्पितास्तदु नात्येति कश्चन एतद्वै तत् ॥ ६ ॥

पदच्छेदः ।

यतः, च, उदेति, सूर्य्यः, अस्तम्, यत्र, च, गच्छति, तम्, देवाः, सर्वे, अर्पिताः, तत्, उ, न, अत्येति, कश्चन, एतत्, वै, तत् ॥

अन्वयः　पदार्थसहित सूक्ष्म भावार्थ	अन्वयः　पदार्थसहित सूक्ष्म भावार्थ
च=और	देवाः=देवता
यतः=जिस प्राणवायु अधिदैव करके	अर्पिताः=अर्पित हैं
सूर्य्यः=सूर्य	उ=और
उदेति=उदय होता है	तत्=उसको
च=और	कश्चन=कोई भी
यत्र=जिस विषे	न=नहीं
अस्तम्=अस्त को	अत्येति=उल्लंघन कर सक्ता है
गच्छति=प्राप्त होता है	तत्=सोई
तम्=तिसी में	वै=निश्चय करके
सर्वे=सब	एतत्=यह ब्रह्म है

मूलम् ।

यदेवेह तदमुत्र यदमुत्र तदन्विह मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ १० ॥

पदच्छेदः ।

यत्, एव, इह, तत्, अमुत्र, यत्, अमुत्र, तत्, अनु, इह, मृत्योः, सः, मृत्युम्, आप्नोति, यः, इह, नाना, इव, पश्यति ॥

अन्वयः　पदार्थसहित सूक्ष्म भावार्थ	अन्वयः　पदार्थसहित सूक्ष्म भावार्थ
यत्=जो	यत्=जो
एव=निश्चय करके	अमुत्र=वहां है
इह=यहां है	तत्=सोई
तत्=सोई	अन्विह=यहां है
अमुत्र=वहां है	यः=जो

इह=इस अद्वैत चेतन विषे
नाना=नानात्व यानी भेद भाव
इव=सा
पश्यति=देखता
सः=सो
मृत्योः=मृत्यु से भी
मृत्युम्=मृत्यु को
आप्नोति=प्राप्त होता है

मूलम् ।

मनसैवेदमाप्तव्यन्नेह नानास्ति किञ्चन मृत्योः स मृत्युङ्गच्छति य इह नानेव पश्यति ॥ ११ ॥

पदच्छेदः ।

मनसा, एव, इदम्, आप्तव्यम्, न, इह, नाना, अस्ति, किञ्चन, मृत्योः, सः, मृत्युम्, गच्छति, यः, इह, नाना, इव, पश्यति ॥

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

मनसा=मन करके
एव=ही
इदम्=यह
आप्तव्यम्=प्राप्त होने योग्य है
इह=इस ब्रह्म विषे
किञ्चन=किंचित्मात्र भी
नाना=नानात्व याने भेद
न=नहीं
अस्ति=है

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

यः=जो
इह=इस ब्रह्म विषे
नाना इव=नानात्व को ही
पश्यति=देखता है
सः=वह
मृत्योः=मृत्यु से भी
मृत्युम्=मृत्युको यानी पुनःपुनः जन्म मरण को
गच्छति=प्राप्त होता है

मूलम् ।

अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ईशानो भूतभव्यस्य न ततो विजुगुप्सते एतद्वै तत् ॥ १२ ॥

पदच्छेदः ।

अंगुष्ठमात्रः, पुरुषः, मध्ये, आत्मनि, तिष्ठति, ईशानः, भूतभव्यस्य, न, ततः, विजुगुप्सते, एतत्, वै, तत् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
अंगुष्ठमात्रः	अंगुष्ठमात्र	ईशानः	प्रेरक है
पुरुषः	पुरुष	ततः	इस लिये
आत्मनि	शरीर के	+ सः	वह
मध्ये	मध्य विषे याने हृदयाकाश में	विजुगुप्सते	रक्षा करने की इच्छा
तिष्ठति	स्थित है	न	नहीं करता है
च	और	तत्	सोई
भूतभव्यस्य	कालत्रय का	वै	निश्चय करके
		एतत्	यह ब्रह्म है

सूलम् ।

अंगुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः ईशानो भूतभव्यस्य स एवाद्य स उ श्वः एतद्वै तत् ॥ १३ ॥

पदच्छेदः ।

अंगुष्ठमात्रः, पुरुषः, ज्योतिः, इव, अधूमकः, ईशानः, भूतभव्यस्य, सः, एव, अद्य, सः, उ, श्वः, एतत्, वै, तत् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
अंगुष्ठमात्रः	अंगुष्ठमात्र	अद्य	आज वर्त्तमान हैं
पुरुषः	पुरुष	उ	और
अधूमकः	धूमरहित	सः	सोई
ज्योतिः	अग्नि की	श्वः	कल याने भविष्यत् है
इव	तरह प्रकाशमान है	ततः	तातें
च	और जो ,	तत्	वही
भूतभव्यस्य	तीनों काल का	वै	निश्चय करके
ईशानः	नियामक ईश्वर है	एतत्	यह ब्रह्म है
सः एव	सोई निश्चय करके		

सूलम् ।

यथोदकन्दुर्गे वृष्टं पर्वतेषु विधावति एवं धर्मान् पृथक्पश्यँस्तानेवानुविधावति ॥ १४ ॥

पदच्छेदः ।

यथा, उदकम्, दुर्गे, वृष्टम्, पर्वतेषु, विधावति, एवम्, धर्मान्, पृथक्, पश्यन्, तान्, एव, अनुविधावति ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यथा	जैसे	धर्मान्	धर्मों को
उदकम्	जल	पृथक्	भिन्न भिन्न
दुर्गे	कठिन	प्रतिशरीरम्	प्रतिशरीरमें
पर्वतेषु	पर्वत पर	+ पुरुषः	जीवात्मा
वृष्टम्	बरसा हुआ	पश्यन्	देखता हुआ
विधावति	निम्न देश में फैल कर नष्ट होजाता है	तान् एव	तिनहीं शरीरों को
एवम्	इसी प्रकार	अनुविधावति	बारंबार प्राप्त होता है

मूलम् ।

यथोदकं शुद्धे शुद्धमासिक्तन्तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतम ॥ १५ ॥

पदच्छेदः ।

यथा, उदकम्, शुद्धे, शुद्धम्, आसिक्तम्, तादृक्, एव, भवति, एवम्, मुनेः, विजानतः, आत्मा, भवति, गौमत ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
गौतम	हे नचिकेता	भवति	बना रहता है
यथा	जैसे	एवम्	इसी प्रकार
उदकम्	जल	विजानतः	ज्ञानी
शुद्धे	शुद्धस्थान में	मुनेः	मुनि का
आसिक्तम्	गिरा हुआ यानी वर्षा हुआ	आत्मा	आत्मा
तादृक् एव	वैसा ही	+ सदा	सदा
शुद्धम्	शुद्ध	शुद्धम्	शुद्ध
		भवति	रहता है

द्वितीयाऽध्यायस्य चतुर्थी वल्ली समाप्ता ॥ ४ ॥

मूलम् ।

पुरमेकादशद्वारमजस्यावक्रचेतसः अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते एतद्वै तत् ॥ १ ॥

पदच्छेदः ।

पुरम्, एकादशद्वारम्, अजस्य, अवक्रचेतसः, अनुष्ठाय, न, शोचति, विमुक्तः, च, विमुच्यते, एतत्, वै, तत् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
अजस्य=जन्मरहित		अनुष्ठाय=ध्यान करके	
अवक्रचेतसः=अकुटिल विज्ञानरूप चेतन आत्मा का		न शोचति=शोक नहीं करता है	
+ इदम्=यह		सः=वह	
एकादशद्वारम्=ग्यारह दरवाजे वाला		विमुक्तः=मुक्त हुआ	
पुरम्=पुररूपी शरीर है		च=भी	
+ यः=जो		विमुच्यते=मुक्त होता है	
तम्=उस पुरके स्वामी को		तत्=सोई	
		वै=निश्चय करके	
		एतत्=यह ब्रह्म है	

मूलम् ।

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्-वरसदृतसद्व्योमसदब्जा गोजा ऋतुजा अद्रिजा ऋतम्बृहत् ॥ २ ॥

पदच्छेदः ।

हंसः, शुचिषत्, वसुः, अन्तरिक्षसत्, होता, वेदिषत्, अतिथिः, दुरोणसत्, नृषत्, वरसत्, ऋतसत्, व्योमसत्, अब्जाः, गोजाः, ऋतुजाः, अद्रिजाः, ऋतम्, बृहत् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
+ अयम् आत्मा=यह आत्मा		शुचिषत्=पवित्र आकाश में स्थित है	
हंसः=हंस है			

वसुः= { वायुरूप होकर सबको अपने विषे बसाने वाला है
अन्तरिक्ष सत्=अन्तरिक्ष में चलने वाला है
होता=अग्निरूप है
वेदिषत्=पृथिवी में स्थित है
अतिथिः=जलरूप होकर
दुरोणसत्=कलश विषे स्थित है
नृसत्=मनुष्यों में स्थित है
वरसत्=देवताओं में स्थित है
ऋतसत्=यज्ञ में स्थित है
व्योमसत्=आकाश में स्थित है
अब्जाः=जलसे उत्पन्न हुआ है
गोजाः=पृथिवी से उत्पन्न हुआ है
ऋतुजाः=यज्ञ से उत्पन्न हुआ है
अद्रिजाः=पर्वत से उत्पन्न भया है
ऋतम्=सत्य है
बृहत्=सब से बड़ा है

मूलम् ।

ऊर्द्ध्वम्प्राणमुन्नयत्यपानं प्रत्यगस्यति मध्ये वामनमासीनं विश्वेदेवा उपासते ॥ ३ ॥

पदच्छेदः ।

ऊर्द्ध्वम्, प्राणम्, उन्नयति, अपानम्, प्रत्यक्, अस्यति, मध्ये, वामनम्, आसीनम्, विश्वेदेवाः, उपासते ॥

अन्वयः — पदार्थसहित सूक्ष्म भावार्थ

यः=जो
प्राणम्=प्राणवायु को
ऊर्द्ध्वम्=ऊपर की ओर
उन्नयति=लेजाता है
च=और
अपानम्=अपानवायु को
प्रत्यक्=नीचे की ओर
अस्यति=फेंकता है
तम्=उस
वामनम्=अंगुष्ठमात्र शिव
मध्ये=हृदयाकाश विषे
आसीनम्=स्थित को
विश्वे=सब
देवाः=चक्षुरादि देवता
उपासते=उपासना करते हैं

मूलम् ।

अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः देहाद्विमुच्यमानस्य किमत्र परिशिष्यते एतद्वै तत् ॥ ४ ॥

पदच्छेदः ।

अस्य, विस्रंसमानस्य, शरीरस्थस्य, देहिनः, देहात्, विमुच्यमानस्य, किम्, अत्र, परिशिष्यते, एतत्, वै, तत् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
विस्रंसमानस्य	बाहर निकलनेवाले
+ च	और
विमुच्यमानस्य	देह को त्यागनेवाले
अस्य	इस
शरीरस्थस्य	शरीर विषे स्थित
देहिनः	जीव आत्मा के
देहात्	देह से पृथक् होनेपर
किम्	क्या
अत्र	इस त्यागेहुये शरीर विषे
परिशिष्यते	अवशेप रहता है अर्थात् कुछ भी शेष रहता नहीं
+ तस्मात्	इसलिये
एतत्	यही
वै	निश्चय करके
तत्	वह ब्रह्म है

मूलम् ।

न प्राणेन नापानेन मर्त्यो जीवति कश्चन इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥ ५ ॥

पदच्छेदः ।

न, प्राणेन, न, अपानेन, मर्त्यः, जीवति, कश्चन, इतरेण, तु, जीवन्ति, यस्मिन्, एतौ, उपाश्रितौ ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
कश्चन	कोई भी
मर्त्यः	मनुष्य
न प्राणेन	न प्राणों करके
च	और
न अपानेन	न अपान करके
जीवति	जीता है
+ परन्तु	परन्तु
इतरेण तु	औरही करके

जीवन्ति=जीवते हैं	उपाश्रितौ=आश्रित हो रहे हैं
यस्मिन्=जिस में	+ तत् एव ब्रह्म=सोई ब्रह्म है
एतौ=वे दोनों प्राणापान	

मूलम् ।

हन्त त इदम्प्रवक्ष्यामि गुह्यम्ब्रह्म सनातनम् यथा च मरणं प्राप्य आत्मा भवति गौतम ॥ ६ ॥

पदच्छेदः ।

हन्त, ते, इदम्, प्रवक्ष्यामि, गुह्यम्, ब्रह्म, सनातनम्, यथा, च, मरणम्, प्राप्य, आत्मा, भवति, गौतम ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
हन्त=अब		यथा=जिस प्रकार	
ते=तुझ से		आत्मा=अज्ञानी पुरुष का आत्मा	
इदम्=इस		मरणम्=मरण को	
सनातनम्=पुरातन		प्राप्य=प्राप्त होके	
गुह्यम्=गोप्य		संसारम्=संसार को	
ब्रह्म=ब्रह्म को		भवति=पावता है	
प्रवक्ष्यामि=कहता हूं		तम्=तिसको	
च=और		शृणु=श्रवण कर	
गौतम=हे नचिकेता			

मूलम् ।

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः स्थाणुमन्येऽनुसंयन्ति यथा कर्म यथा श्रुतम् ॥ ७ ॥

पदच्छेदः ।

योनिम्, अन्ये, प्रपद्यन्ते, शरीरत्वाय, देहिनः, स्थाणुम्, अन्ये, अनुसंयन्ति, यथा, कर्म, यथा, श्रुतम् ॥

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

अन्ये=ज्ञानवान् से अन्य
देहिनः=देहाभिमानी अज्ञानी
शरीरत्वाय=शरीर के अर्थ
योनिम्=अनेक योनिको
यथाकर्म=कर्म के अनुसार
च=और
यथाश्रुतम्=प्रवृत्तिशास्त्र श्रवणानुसार
प्रपद्यन्ते=प्राप्त होते हैं

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

अन्ये=सकाम कर्म करने वालों से भी अन्य अत्यन्त मूढ़ पुरुष
स्थाणुम्=जङ्गमभाव को यानी वृक्ष पाषाण आदि को
यथाकर्म=कर्मानुसार
च=और
यथाश्रुतम्=कपोल कल्पित शास्त्र श्रवणानुसार
अनुसंयन्ति=प्राप्त होते हैं

मूलम् ।

य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन एतद्वै तत् ॥ ८ ॥

पदच्छेदः ।

यः, एषः, सुप्तेषु, जागर्ति, कामम्, कामम्, पुरुषः, निर्मिमाणः, तत्, एव, शुक्रम्, तत्, ब्रह्म, तत्, एव, अमृतम्, उच्यते, तस्मिन्, लोकाः, श्रिताः, सर्वे, तत्, उ, न, अत्येति, कश्चन, एतत्, वै, तत् ॥

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

यः=जो
एषः=यह
पुरुषः=पुरुष
सुप्तेषु=स्वप्न विषे
कामंकामम्=वांछित विषयों को
निर्मिमाणः=रचता हुआ
जागर्ति=जागता है

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

तत् एव=सोई
तत्=वह
शुक्रम्=शुद्ध
ब्रह्म=ब्रह्म है
च=और
तत् एव=सोई
अमृतम्=अविनाशी

उच्यते=कहा जाता है
तस्मिन्=तिसही विषे
सर्वे=सब
लोकाः=लोक
श्रिताः=आश्रित हैं
+ च=और
तत्=उसको
कश्चन=कोई भी
न=नहीं
अत्येति=उल्लंघन करता है
+ अस्मात् कारणात्=इसी कारण से
एतत् वै=यही
तत्=वह ब्रह्म है

मूलम् ।

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ ९ ॥

पदच्छेदः ।

अग्निः, यथा, एकः, भुवनम्, प्रविष्टः, रूपम्, रूपम्, प्रतिरूपः, बभूव, एकः, तथा, सर्वभूतान्तरात्मा, रूपम्, रूपम्, प्रतिरूपः, बहिः, च ॥

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

यथा=जैसे
एकः=एक
अग्निः=अग्नि
भुवनम्=भुवन विषे
प्रविष्टः=प्रवेश करता हुआ
रूपम् रूपम्=रूपरूप से याने अनेक रूप से
प्रतिरूपः=हर एक उपाधि के साथ तद्रूप
बभूव=होता भया
तथा=वैसेही

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

सर्वभूतान्तरात्मा=सब भूतों के अन्तर का आत्मा भी
एकः=एक होता हुआ
रूपम् रूपम्=देह देह के प्रति
प्रतिरूपः=तादात्म्याऽध्यास करके
बभूव=तद्रूपही होता भया
च=और
बहिः=आकाशवत् सबके बाहर भी स्थित होता भया

मूलम् ।

वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ १० ॥

पदच्छेदः ।

वायुः, यथा, एकः, भुवनम्, प्रविष्टः, रूपम्, रूपम्, प्रतिरूपः, बभूव, एकः, तथा, सर्वभूतान्तरात्मा, रूपम्, रूपम्, प्रतिरूपः, बहिः, च ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यथा	जैसे	सर्वभूतान्तरात्मा	सब भूतों का अन्तरात्मा
एकः	एक	एकः	एक होता हुआ
वायुः	वायु	रूपम् रूपम्	देह देह प्रति
भुवनम्	चतुर्दश लोक में	प्रतिरूपः	तादात्म्यरूप
प्रविष्टः	प्रवेश करता हुआ	बभूव	होता भया
रूपम् रूपम्	शरीर शरीर प्रति	च	और
प्रतिरूपः	तद्रूप	बहिः	बाहर भी आकाशवत् व्याप्त होता भया
बभूव	होता भया		
तथा	वैसेही		

मूलम् ।

सूर्य्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥ ११ ॥

पदच्छेदः ।

सूर्य्यः, यथा, सर्वलोकस्य, चक्षुः, न, लिप्यते, चाक्षुषैः, बाह्यदोषैः एकः, तथा, सर्वभूतान्तरात्मा, न, लिप्यते, लोकदुःखेन, बाह्यः ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यथा	जैसे	तथा	वैसेही
सूर्य्यः	सूर्य	एकः	एक
सर्वलोकस्य	सब लोकों का	सर्वभूतान्तरात्मा	सब भूतों का अंतरात्मा
चक्षुः	नेत्रभूत होता हुआ	बाह्यः	पृथक् होता हुआ
चाक्षुषैः	लोकों के चक्षुओं के	लोकदुःखेन	लोकों के दुःखसे
बाह्यदोषैः	बाह्यदोषों करके	न लिप्यते	नहीं लिपायमान होताहै
न लिप्यते	नहीं लिपायमान होता है		

मूलम् ।

एको वशी सर्वभूतान्तरात्मा एकं रूपं वहुधा यः करोति तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥ १२ ॥

पदच्छेदः ।

एकः, वशी, सर्वभूतान्तरात्मा, एकम्, रूपम्, वहुधा, यः, करोति, तम्, आत्मस्थम्, ये, अनुपश्यन्ति, धीराः, तेषाम्, सुखम्, शाश्वतम्, न, इतरेषाम् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
सर्वभूतान्तरात्मा	सब भूतों का अन्तर आत्मा
एकः	एक है
वशी	सबको वश करने वाला है
एकम् रूपम्	अपने एकही रूपको
वहुधा	उपाधी करके बहुत प्रकार का
यः	जो
करोति	करलेता है
तम्	तिस
आत्मस्थम्	शरीरमें स्थित आत्माको
ये	जो
धीराः	विवेकी पुरुष
अनुपश्यन्ति	अनुभव करते हैं
तेषाम्	तिनकोही
शाश्वतम्	नित्य
सुखम्	सुखहोता है
इतरेषाम्	इतर पुरुषों को
न	नहीं होता है

मूलम् ।

नित्योऽनित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥ १३ ॥

पदच्छेदः ।

नित्यः, अनित्यानाम्, चेतनः, चेतनानाम्, एकः, बहूनाम्, यः, विदधाति, कामान्, तम्, आत्मस्थम्, ये, अनुपश्यन्ति, धीराः, तेषाम्, शान्तिः, शाश्वती, न, इतरेषाम् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यः	जो व्यापक आत्मा	विदधाति	देता है
अनित्यानाम्	अनित्य जगत् आदिकों का	तम्	तिस
नित्यः	अधिष्ठान कारणरूप नित है	आत्मस्थम्	बुद्धिमें स्थित आत्माको
च	और	ये	जो
चेतनानाम्	चेतनका भी	धीराः	विवेकी पुरुष
चेतनः	चेतन है	अनुपश्यन्ति	अनुभव करते हैं
सः	सोई	तेषाम्	उनको
एकः	एक हुआ हुआ	शाश्वती	नित्य
बहूनाम्	अनंत जीवों प्रति	शान्तिः	शान्तिरूप मोक्ष प्राप्त है
कामान्	कर्मों अनुसार भोगोंको	इतरेषाम्	औरों को
		न	नहीं

मूलम् ।

तदेतदिति मन्यन्तेऽनिर्देश्यम्परमं सुखम् कथन्नु तद्विजानीयां किमु भाति विभाति वा ॥ १४ ॥

पदच्छेदः ।

तत्, एतत्, इति, मन्यन्ते, अनिर्देश्यम्, परमम्, सुखम्, कथम्, नु, तत्, विजानीयाम्, किमु, भाति, विभाति, वा ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यत्	जो	इति	ऐसा
परमम्	उत्कृष्ट	+ ब्रह्मविदः	ब्रह्मवेत्ता
सुखम्	सुख	मन्यन्ते	मानते हैं
अनिर्देश्यम्	कहने में आवै नहीं	भगवन्	हे भगवन्
तत्	सोई	तत्	उस परमात्मा को
एतत्	यह आत्मा ज्ञानस्वरूप है	कथम् नु	कैसे

विजानीयाम्=जानूं मैं	वा=और
तत्=वह	किमु=कैसे
किमु=कैसे	विभाति=स्पष्टभासता है
भाति=प्रकाशता है	

नोट—नचिकेता यमराज भगवान् से कहता है कि हे भगवन् जो सुखरूप आत्मा ब्रह्मवेत्ताओं को प्राप्त है उसको मैं कैसे जानूं ॥

मूलम् ।

न तत्र सूर्यो भाति न चन्द्रतारकन्नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भान्तमनुभाति सर्वन्तस्य भासा सर्वमिदं विभाति ॥१५ ॥

पदच्छेदः ।

न, तत्र, सूर्यः, भाति, न, चन्द्रतारकम्, न, इमाः, विद्युतः, भान्ति, कुतः, अयम्, अग्निः, तम्, एव, भान्तम्, अनुभाति, सर्वम्, तस्य, भासा, सर्वम्, इदम्, विभाति ॥

अन्वयः पदार्थसहित सूक्ष्म भावार्थ	अन्वयः पदार्थसहित सूक्ष्म भावार्थ
तत्र=तिस को	अयम्=यह
सूर्यः=सूर्य	अग्निः=लौकिक अग्नि
न भाति=नहीं प्रकाश कर सक्ता है	+ प्रकाशयिष्यति=प्रकाश करेगी किन्तु नहीं करेगी
च=और	तम् एव=तिसही
चन्द्रतारकम्=चंद्रमा सहित तारों के	भान्तम्=प्रकाशमान के पीछे
न भाति=नहीं प्रकाश कर सक्ता है	सर्वम्=सब जगत्
च=और	अनुभाति=प्रकाशमान होता है
इमाः=ये	च=और
विद्युतः=बिजुलियां भी	तस्य=तिसही के
न भान्ति=नहीं प्रकाश कर सक्ती हैं	भासा=प्रकाश करके
+ तर्हि=तब	इदंसर्वम्=यह सम्पूर्ण सूर्यादि
कुतः=कैसे	विभाति=प्रकाशमान होता है
तम्=उसको	

इति द्वितीयाध्याये पञ्चमवल्ली समाप्ता ॥ ५ ॥

मूलम् ।

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन एतद्वैतत् ॥ १ ॥

पदच्छेदः ।

ऊर्ध्वमूलः, अवाक्शाखः, एषः, अश्वत्थः, सनातनः, तत्, एव, शुक्रम्, तत्, ब्रह्म, तत्, एव, अमृतम्, उच्यते, तस्मिन्, लोकाः, श्रिताः, सर्वे, तत्, उ, न, अत्येति, कश्चन, एतत्, वै, तत् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
एषः	यह संसार
ऊर्ध्वमूलः	ऊर्ध्वमूल
अवाक्शाखः	नीचे शाखा वाला
सनातनः	अनादि काल का
अश्वत्थः	पीपल का वृक्ष है
तत् एव	तिस संसाररूपी वृक्ष का मूल
शुक्रम्	शुद्ध
ब्रह्म	ब्रह्म है
च	और
तत् एव	वही
अमृतम्	अविनाशी
उच्यते	कहा जाता है
तस्मिन्	उस विषे
सर्वे	सब
लोकाः	लोक
श्रिताः	आश्रयको प्राप्त हैं
उ	और
तत्	उस को
कश्चन	कोई भी
न अत्येति	नहीं उल्लंघन करसक्ता है
एतत्	यही
वै	निश्चय करके
तत्	वह ब्रह्म है

मूलम् ।

यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम् महद्भयम् वज्रमुद्यतं य एतद्विदुरमृतास्ते भवंति ॥ २ ॥

पदच्छेदः ।

यत्, इदम्, किञ्च, जगत्, सर्वम्, प्राणे, एजति, निःसृतम्, महद्भयम्, वज्रम्, उद्यतम्, ये, एतत्, विदुः, अमृताः, ते भवन्ति ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यत्=जो		निःसृतम्=निकसा भया है	
किञ्च=कुछ		महद्भयम्=वह ब्रह्म बड़ा भय वाला है	
इदम्=यह		वज्रम्=वज्र को	
सर्वम्=सब		उद्यतम्=उठाये हुये है	
जगत्=जगत् है		ये=जो विवेकी जन	
तत्=सो		एतत्=इसको	
प्राणे=प्राणरूपी ब्रह्म विषे		विदुः=जानते हैं	
एजति=चलता है यानी उसीके आश्रय है		ते=वे	
च=और		अमृताः=अमर	
ततः=तिसी से		भवन्ति=होते हैं	

मूलम् ।

भयादस्याग्निस्तपति भयात्तपति सूर्य्यः भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥ ३ ॥

पदच्छेदः ।

भयात्, अस्य, अग्निः, तपति, भयात्, तपति, सूर्यः, भयात्, इन्द्रः, च, वायुः, च, मृत्युः, धावति, पञ्चमः ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
अस्य=इस परमात्मा के		तपति=तपता है	
भयात्=भयसे		च=और	
अग्निः=अग्नि		इन्द्रः=इन्द्र	
तपति=तपता है		अस्य=इसके	
च=और		भयात्=भय से	
सूर्य्यः=सूर्य भी		धावति=दौड़ता है यानी वर्षा करता है	
अस्य=इसी के		च=और	
भयात्=भय से			

वायुः=वायु
अस्य=इसी के
भयात्=भय से
धावति=चलता है
च=और
पञ्चमः=पांचवां
मृत्युः=मृत्यु
धावति=दौड़ता है

मूलम् ।

इह चेदशकद्वोद्धुम्प्राक् शरीरस्य विस्रसः ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥ ४ ॥

पदच्छेदः ।

इह, चेत्, अशकत्, बोद्धुम्, प्राक्, शरीरस्य, विस्रसः, ततः, सर्गेषु, लोकेषु, शरीरत्वाय, कल्पते ॥

अन्वयः — पदार्थसहित सूक्ष्म भावार्थ

इह=इसी जन्म में
शरीरस्य=शरीर के
विस्रसः=पात होने से
प्राक्=पहले
चेत्=यदि
बोद्धुम्=जानने को
अशकत्=समर्थ भया
तदा=तो
+ संसार बंधनात्=संसार के बंधन से
+ विमुच्यते=छूटजाता है

अन्वयः — पदार्थसहित सूक्ष्म भावार्थ

+ नचेत्=और अगर नहीं
+ बोद्धुम्=जानने को
असकत्=समर्थ भया
ततः=तो
सर्गेषु=पृथिवी आदि
लोकेषु=लोकों विषे
शरीरत्वाय=शरीर धारणार्थ
कल्पते=समर्थ होता है यानी अनेक योनियों को प्राप्त होता है

मूलम् ।

यथाऽदर्शे तथाऽऽत्मनि यथा स्वप्ने तथा पितृलोके यथाऽप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके ॥ ५ ॥

पदच्छेदः ।

यथा, आदर्शे, तथा, आत्मनि, यथा, स्वप्ने, तथा, पितृलोके, यथा, अप्सु, परि, इव, ददृशे, तथा, गंधर्वलोके, छा[illegible]योः, इव, ब्रह्मलोके ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यथा=जैसे		परिइव=चारोंतरफसे भरेहुये	
आदर्शे=दर्पण विषे अपना प्रतिबिंब		अप्सु=जल विषे प्रतिबिंब	
तथा=तैसे		ददृशे=दिखलाई देता है	
आत्मनि=बुद्धि विषे चिदाभास		तथा=तैसेही	
ददृशे=दिखाई पड़ता है		गन्धर्वलोके=गन्धर्वलोक विषे	
च=और		च=और	
यथा= जैसे		छायातपयोः=छाया धूपकी	
स्वप्ने=स्वप्न विषे		इव=तरह	
तथा=वैसेही		अयम् आत्मा =यह आत्मा	
पितृलोके=पितृलोकविषे		ब्रह्मलोके=ब्रह्मलोक विषे	
ददृशे=दिखलाई देता है		ददृशे =दिखलाई देता है	
च=और			
यथा=जैसे			

सूलम् ।

इन्द्रियाणाम्पृथक्भावमुदयास्तमयौचयत् पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ॥ ६ ॥

पदच्छेदः ।

इन्द्रियाणाम्, पृथक्, भावम्, उदयास्तमयौ, च, यत्, पृथक्, उत्पद्यमानानाम्, मत्वा, धीरः, न, शोचति ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
च=और		उदयास्तमयौ=उत्पत्ति प्रलयरूप अथवा जाग्रत् सुषुप्ति रूप	
पृथक्=भिन्न		मत्वा=जान करके	
उत्पद्यमानानाम्=उत्पन्न भये		धीरः=धीर पुरुष	
इन्द्रियाणाम्=इन्द्रियों के		न शोचति=शोक को नहीं प्राप्त होता है	
यत्=जो			
पृथक्भावम्=भिन्न भाव हैं			
तत्=उसको			

मूलम्।

इन्द्रियेभ्यः परंमनो मनसः सत्त्वमुत्तमम् सत्त्वादधिमहानात्मा महतोव्यक्तमुत्तमम् ॥ ७ ॥

पदच्छेदः।

इन्द्रियेभ्यः, परम्, मनः, मनसः, सत्त्वम्, उत्तमम्, सत्त्वात्, अधि, महान्, आत्मा, महतः, अव्यक्तम्, उत्तमम् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
इन्द्रियेभ्यः=इन्द्रियों से		महानात्मा=महत्तत्त्व	
परम्=परे याने श्रेष्ठ		अधि=श्रेष्ठ है	
मनः=मन है		+ च=और	
मनसः=मन से		महतः=महत्तत्त्व से	
सत्त्वम्=बुद्धि		अव्यक्तम्=अव्यक्त	
उत्तमम्=श्रेष्ठ है		उत्तमम्=श्रेष्ठ है	
सत्त्वात्=बुद्धि से भी			

मूलम्।

अव्यक्तात्तुपरः पुरुषोव्यापकोऽलिंगएव च यज्ज्ञात्वामुच्यते जन्तुरमृतत्वञ्च गच्छति ॥ ८ ॥

पदच्छेदः।

अव्यक्तात्, तु, परः, पुरुषः, व्यापकः, अलिंगः, एव, च, यत्, ज्ञात्वा, मुच्यते, जन्तुः, अमृतत्वम्, च, गच्छति ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
तु=और		अमृतत्वम्=अमर भाव को	
यत्=जिसको		गच्छति=प्राप्त होता है	
ज्ञात्वा=जान करके		सः=वह	
जन्तुः=मनुष्य		पुरुषः=पुरुष	
मुच्यते=मुक्त होजाता है		अव्यक्तात्=अव्यक्त से	
च=और		परः=परे है	

व्यापकः=व्यापक है	एव=निश्चय करके
च=और	अलिंगः=चिह्नरहित है

मूलम् ।

न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥ ९ ॥

पदच्छेदः ।

न, सन्दृशे, तिष्ठति, रूपम्, अस्य, न, चक्षुषा, पश्यति, कश्चन, एनम्, हृदा, मनीषा, मनसा, अभिक्लृप्तः, ये, एतत्, विदुः, अमृताः, ते, भवन्ति ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
अस्य=इस प्रत्यगात्माका		+ च=और	
रूपम्=रूप		मनसा=मन करके	
सन्दृशे=दर्शनविषे		अभिक्लृप्तः=प्रकाशित हुवा	
न तिष्ठति=नहीं स्थित होता है		एतत्=यह ब्रह्म है	
च=और		एवम्=इस प्रकार इसको	
कश्चन=कोई भी		ये=जो	
एनम्=इसको		विदुः=जानते हैं	
चक्षुषा=चक्षुकरके		ते=वे	
न पश्यति=नहीं देखता है		अमृताः=अमर	
हृदा=हृदय में स्थित		भवन्ति=होते हैं	
मनीषा=बुद्धि करके			

मूलम् ।

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह बुद्धिश्च न विचेष्टते तामाहुः परमाङ्गतिम् ॥ १० ॥

पदच्छेदः ।

यदा, पञ्च, अवतिष्ठन्ते, ज्ञानानि, मनसा, सह, बुद्धिः, च, न, विचेष्टते, ताम्, आहुः, परमाम्, गतिम् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यदा	जिस काल विषे
पञ्च	पांचों
ज्ञानानि	ज्ञानेन्द्रियां
सह	सहित
मनसा	मनके
अवतिष्ठन्ते	आत्मा में स्थिर होजाती हैं
च	और
बुद्धिः	बुद्धि भी
न विचेष्टते	नहीं चेष्टाकरती है
ताम्	उस अवस्था को
परमाम्	परम
गतिम्	गति
आहुः	कहते हैं

मूलम् ।

तां योगमितिमन्यन्ते स्थिरामिन्द्रियधारणाम् अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ॥ ११ ॥

पदच्छेदः ।

ताम्, योगम्, इति, मन्यन्ते, स्थिराम्, इन्द्रियधारणाम्, अप्रमत्तः, तदा, भवति, योगः, हि, प्रभवाप्ययौ ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
मुमुक्षुः	मुमुक्षु
यदा	जब
इन्द्रियधारणाम्	इन्द्रियों के स्वभाव
स्थिराम्	स्थिर
कर्तुम्	करने को
अप्रमत्तः	प्रमाद रहित होता है
तदा	तब
योगः	योग
भवति	होता है
हि	क्योंकि
योगः	योग
प्रभवाप्ययौ	उत्पत्ति और लय रूप है
+ च	और
ताम्	उस अवस्था को
योगम्	योग
इति	करके
मन्यन्ते	मानते हैं

मूलम् ।

नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥ १२ ॥

पदच्छेदः ।

न, एव, वाचा, न, मनसा, प्राप्तुम्, शक्यः, न, चक्षुषा, अस्ति, इति, ब्रुवतः, अन्यत्र, कथम्, तत्, उपलभ्यते ॥

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

तत्=वह ब्रह्म
एव=निश्चय करके
न वाचा=न वाणी से
न मनसा=न मनसे
न चक्षुषा=न चक्षुसे
प्राप्तुम्=पानेको
शक्यम्=शक्य है
अन्यत्र=सिवाय
अस्ति=अस्तिपद
इति=करके
कथम्=और किस प्रकार
ब्रुवतः=श्रद्धावान् अस्तित्व-वादियों करके
तत्=वह
उपलभ्यते=प्राप्त किया जाता है

मूलम् ।

अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति ॥ १३ ॥

पदच्छेदः ।

अस्ति, इति, एव, उपलब्धव्यः, तत्त्वभावेन, च, उभयोः, अस्ति, इति, एव, उपलब्धस्य, तत्त्वभावः, प्रसीदति ॥

अन्वयः पदार्थसहित सूक्ष्म भावार्थ

अस्ति=है
इति एव=ऐसेही
तत्त्वभावेन=तत्त्वभाव करके
तत्=वह आत्मा
उपलब्धव्यः=प्राप्त होने योग्य है
च=और
उपलब्धस्य=प्राप्त होने योग्य
उभयोः=उन दोनों का याने सोपाधिक निरुपाधिक आत्माका
तत्त्वभावः=एकत्वभाव
अस्ति=है
इति=इस करकेही
प्रसीदति=प्रतीत होता है ॥

मूलम् ।

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदिश्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ १४ ॥

पदच्छेदः ।

यदा, सर्वे, प्रमुच्यन्ते, कामाः, ये, अस्य, हृदिश्रिताः, अथ, मर्त्यः, अमृतः, भवति, अत्र, ब्रह्म, समश्नुते ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
अस्य	इस विद्वान् पुरुष के	अथ	तब
हृदि	हृदयविषे	मर्त्यः	मनुष्य
ये	जो	अमृतः	अमर
कामाः	कामना	भवति	होता है
श्रिताः	स्थित हैं	+ च	और
ते	वे	अत्र	इसी जन्म में
सर्वे	सब	ब्रह्म	ब्रह्मको
यदा	जब	अश्नुते	प्राप्त होता है ॥
प्रमुच्यन्ते	छूट जाते हैं		

मूलम् ।

यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः अथ मर्त्योऽमृतो भवत्येतावदनुशासनम् ॥ १५ ॥

पदच्छेदः ।

यदा, सर्वे, प्रभिद्यन्ते, हृदयस्य, इह, ग्रन्थयः, अथ, मर्त्यः, अमृतः, भवति, एतावत्, अनुशासनम् ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
यदा	जब	ग्रन्थयः	ग्रन्थियां
हृदयस्य	हृदय की	इह	इसी जन्म में
सर्वे	सम्पूर्ण	प्रभिद्यन्ते	टूटजाती हैं

अथ=तब	भवति=होता है
मर्त्यः=मनुष्य	एतावत्=इतनाही
अमृतः=मरण रहित	अनुशासनम्=उपदेश है ॥

मूलम् ।

शतञ्चैका च हृदयस्य नाड्यस्तासाम्मूर्द्धानमभिनिःसृतैकात-योर्ध्वमायन्नमृतत्वमेति विष्वङ् ङन्या उत्क्रमणे भवन्ति ॥ १६ ॥

पदच्छेदः ।

शतम्, च, एका, च, हृदयस्य, नाड्यः, तासाम्, मूर्द्धानम्, अभिनिःसृता, एका, तया, ऊर्ध्वम्, आयन्, अमृतत्वम्, एति, विष्वक्, अन्याः उत्क्रमणे, भवन्ति ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
च	और	+ जीवः	जीव पुरुष
शतं एका	एकसौ एक	अमृतत्वम्	अमर भाव को
हृदयस्य	हृदय की	एति	प्राप्त होता है
नाड्यः	नाडियां हैं	च	और
तासाम्	तिनमें से	अन्याः	इतर नाडियां
मूर्द्धानम्	मस्तक को	विष्वक्	सर्व ओर से
अभिनिःसृता	भेद करके निकसी भई	उत्क्रमणे	मरण विषे याने नाना योनियों की प्राप्ति विषे
एका	एक नाडी है	भवन्ति	निमित्त कारण होती हैं ॥
तया	उसी नाडी द्वारा		
ऊर्ध्वम्	ऊपर को		
आयन्	जाता हुआ		

मूलम् ।

अंगुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः तन्स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण तं विद्याच्छुक्रममृतं विद्याच्छुक्रममृतमिति ॥ १७ ॥

पदच्छेदः ।

अंगुष्ठमात्रः, पुरुषः, अन्तरात्मा, सदा, जनानाम्, हृदये, सन्निविष्टः, तम्, स्वात्, शरीरात्, प्रवृहेत्, मुञ्जात्, इव, इषीकाम्, धैर्येण, तम्, विद्यात्, शुक्रम्, अमृतम्, तम्, विद्यात्, शुक्रम्, अमृतम्, इति ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
अंगुष्ठमात्रः	अंगुष्ठमात्र	इषीकाम्	सरकंडेको
पुरुषः	पुरुष	पृथक्	पृथक्
अन्तरात्मा	प्रत्यक् आत्मा	कुर्वन्ति	करते हैं
सदा	सर्वदा	धैर्येण	धैर्य करके
जनानाम्	मनुष्यों के	तम्	तिसको
हृदये	हृदयविषे	शुक्रम्	शुद्ध
सन्निविष्टः	स्थित है	अमृतम्	अमृतरूप
तम्	तिसको	इति	ऐसा
स्वात्	अपने	तम्	तिसको
शरीरात्	शरीरसे	शुक्रम्	शुद्ध
प्रवृहेत्	पृथक् करै	अमृतम् इति	अमृतरूप ऐसा
इव	जैसे	विद्यात्	जानै ॥
मुञ्जात्	मूंजसे		

मूलम् ।

मृत्युप्रोक्तान्नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिञ्च कृत्स्नम्
ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योप्येवं यो विदध्यात्ममेव ॥ १८ ॥

पदच्छेदः ।

मृत्युप्रोक्ताम्, नचिकेतः, अथ, लब्ध्वा, विद्याम्, एताम्, योग-विधिम्, च, कृत्स्नम्, ब्रह्मप्राप्तः, विरजः, अभूत्, विमृत्युः, अन्यः, अपि, एवम्, यः, वित्, अध्यात्मम्, एव ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ	अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
अथ	तदनन्तर	विद्याम्	विद्याको
मृत्युप्रोक्ताम्	मृत्यु करके कही हुई	च	और
एताम्	इस	कृत्स्नम्	संपूर्ण

योगविधिम्=योगविधि को
नचिकेतः=नचिकेत
लब्ध्वा=पाकरके
ब्रह्मप्राप्तः=ब्रह्मको प्राप्त होता हुआ
विरजः=धर्म अधर्मसेरहित
विमृत्युः=मृत्युरहित
अभूत्=होता भया
अन्यः अपि=और भी
एवम्=इस प्रकार
यः=जो
मुमुक्षुः=मुमुक्षुपुरुष
अध्यात्मम्=अध्यात्म विद्या को
वित्=जानने वाला है
सः=वह
अपि=भी
ब्रह्म=ब्रह्म को
आप्नोति=प्राप्त होता है ॥

मूलम् ।

ॐ स नाववतु सहनौ भुनक्तु सह वीर्य्यं करवावहै तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥ १९ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

इति कठोपनिषद्समाप्तिमगात् शुभम् ॥

पदच्छेदः ।

सः, नौ, अवतु, सहनौ, भुनक्तु, सह, वीर्य्यम्, करवावहै, तेजस्वि, नौ, अधीतम्, अस्तु, मा, विद्विषावहै ॥

अन्वयः	पदार्थसहित सूक्ष्म भावार्थ
सः	वह परमात्मा
नौ	हम गुरु शिष्य दोनों को
सह	साथही
अवतु	रक्षा करै
+ च	और
नौ	हम दोनों को
सह	साथही
भुनक्तु	पालन करै
+ च	और
+ आवाम्सह	हम दोनों साथही
वीर्य्यम्	सामर्थ्य को
करवावहै	प्राप्त होवैं
नौ	हम दोनों का
अधीतम्	पढ़ा हुआ
तेजस्वि	तेजवान्
अस्तु	होवै
आवाम्	हम दोनों परस्पर
मा	न
विद्विषावहै	द्वेषको प्राप्त होवैं ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

इति कठोपनिषद्भाषाटीका समाप्ता ॥

अनुवादक की अनूदित अन्यान्य पुस्तकें।

पुस्तक	मूल्य
छान्दोग्योपनिषद्	३।)
तैत्तरीयोपनिषद्	॥≈)
ईशावास्योपनिषद्	≈)
ऐतरेयोपनिषद्	।)॥
केनोपनिषद्	≈)॥
प्रश्नोपनिषद्	॥)
माण्डूक्योपनिषद्	≡)
मुण्डकोपनिषद्	॥)
रामगीता	१)
विष्णुसहस्रनाम	१)
अष्टावक्रगीता	१।-)
भगवद्गीता	२)
रामदर्पण	।)
पथिकदर्शन	।≈)
याज्ञवल्क्यमैत्रेयी संवाद	।)
परापूजा	।)
सांख्यकारिकातत्त्व-बोधिनी	।≡)
सांख्यतत्त्वसुबोधिनी	।-)

उपन्यास—

पुस्तक	मूल्य
ब्रह्मदर्पण	॥।)
चित्तविलास प्रथम व द्वितीय भाग	॥)॥
मनोरञ्जन	।=)
रामप्रताप	॥)

वेदान्त संबंधी अन्यान्य पुस्तकों के लिए बड़ा सूचीपत्र मुफ्त मँगाइए।

मिलने का पताः—

मैनेजर,

नवलकिशोर प्रेस (बुकडिपो)

लखनऊ.